

# कलियाचकविक्रमकिशोरआदर्शसंस्कृतमहाविद्यालयः

(केन्द्रीयमानवसंसाधनविकाशमन्त्रालययोजनान्तर्गतः, नवदिल्लीस्थराष्ट्रियसंस्कृतसंस्थान(मानितविश्वविद्यालय)-अनुमोदितः)

हेडिया, पूर्वमेदिनीपुरम्, पश्चिमवंगः-७२१४३०

वर्षम्-२०१९-२०२० | प्रथमपुष्पम्

# कलियाचक-आदर्शवार्त्ता

## (वार्षिकी वार्त्ता पत्रिका)

शकाब्दः-१९४१ | विक्रमाब्दः-१९४१

प्रो. पी.एन्. शास्त्री
कुलपति
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
('ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन परिषद् द्वारा मान्यता प्राप्त)

Prof. P.N. Shastry
Vice-Chancellor
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under MHRD, Govt. of India)
(Accredited by NAAC with 'A' Grade)

RSkS/VC-101/2019-20/136

Date 03.03.2020



**कुलपतिसन्देशः**

तन्मे मनः शिवसङ्कल्पमस्तु

राष्ट्रियसंस्कृतसंस्थानान्तर्गतेषु आदर्शमहाविद्यालयेषु पश्चिमवङ्गस्थपूर्वमेदिनीपुरमण्डलान्तर्गतेन कलियाचकविक्रमकिशोरआदर्शसंस्कृतमहाविद्यालयेन महाविद्यालयीय-वार्षिकसंस्कृतवार्त्ता 'कलियाचक-आदर्शवार्त्ता' प्रकाश्यते इति ज्ञात्वा मोमुद्यते मे चेतः। भगवत्याः अनुग्रहेण महाविद्यालयः संस्कृतसंस्कृतिरक्षणाय प्रचायाय प्रसाराय च प्रवर्तताम् इति कामये।

अस्मिन्नेवावसरे सर्वेऽपि महाविद्यालयस्यान्तेवासिनः भृशमभिनन्दनीयाः।

इति-

प.ना.शास्त्री

(प्रो. परमेश्वरनारायणशास्त्री)

कुलपतिः

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 28523949 (Fax) 28521948
EPABX : 28524993, 28521994, 28524995 E.Mail : rskspvc@yahoo.com

प्रो. एस्. सुब्रह्मण्य शर्मा
कुलसचिव
राष्ट्रिय संस्कृत संस्थान
मानित विश्वविद्यालय
(मानव संसाधन विकास मंत्रालय, भारत सरकार के अधीन)
['ए' ग्रेड के साथ राष्ट्रीय मूल्यांकन एवं प्रत्यायन द्वारा मान्यता प्राप्त]

Prof. S. Subrahmanya Sarma
REGISTRAR
RASHTRIYA SANSKRIT SANSTHAN
Deemed to be University
(Under Ministry of HRD, Govt. of India)
[Accredited with 'A' Grade by NAAC]



**कुलसचिवसन्देशः**

'आनो भद्राः क्रतवो यन्तु विश्वतः' इति आर्षवाणी निगदति यत् उत्तमं चिन्तनं विश्वस्य समग्रेभ्यः प्रदेशेभ्यः ग्राह्यम् इति। तथैव अस्माकं सुविचारोऽपि विश्वस्य विभिन्नेभ्यः प्रदेशेभ्यः प्रापणीयः। अमुं विषयमवगम्य पश्चिमवङ्गराज्यान्तर्गतपूर्वमेदिनीपुरस्थः राष्ट्रियसंस्कृतसंस्थानेन संबद्धः कालियाचकविक्रमकिशोरआदर्शसंस्कृतमहाविद्यालयः ऐदम्प्राथम्येन 'कालियाचकआदर्शवार्ता' नामकं वार्तापत्रं प्रकाशयति इति विज्ञाय अत्यन्तं हर्षम् अनुभवामि। वार्तापत्रमिदं महाविद्यालयान्तेवासिनां शेमुषीवर्धनाय सामाजिकेभ्यः विद्यालयस्य प्रगतेः प्रापणाय च सेतुरिव स्यादिति विश्वसिमि। पत्रिकायाः संपादकानां प्राचार्याणाम् अध्यापकानां च प्रयासः भूरि प्रशंसनीयः। वार्तापत्रमिदं सर्वजनग्राह्यं भवतु इति भगवन्तं प्रार्थये।

यौष्माकः

प्रो. एस्. सुब्रह्मण्य शर्मा

56-57, Institutional Area, Janakpuri, New Delhi-110058 Ph.: (O) 011-28520979 (Fax) 011-28520976
EPABX : 28524993, 28521994, 28524995 E.Mail : sanskrit.registrar@gmail.com / ps2reg.sansthan@gmail.com
Website : www.sanskrit.nic.in



## अध्यक्षशुभकामनाः

भगवतः पुरुषोत्तमस्यानुकम्पया कलियाचक-विक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालय पक्षतः प्रप्रथमतया **कालियाचकादर्शवार्त्ता** प्रकाशतां यातीति विज्ञाय महान्तमानन्दमनुभवामि। शिक्षावर्षेऽस्मिन् महाविद्यालये समायोजितानां विभिन्नानां कार्यक्रमाणां सर्वं वृत्तजातं सचित्रं प्रकाशनाय प्रयासो विहितः। आदर्शवार्त्तामिमां महाविद्यालयस्यान्तर्जालेऽपि स्थापयितुं योजना वर्तते। अनेन महाविद्यालये प्रवर्त्तितानां शैक्षिक-सांस्कृतिक-सारस्वत-क्रीडादिकार्यक्रमाणां विवरणं सर्वैः विज्ञातुं शक्यते। आदर्शवार्त्तामाध्यमेन महाविद्यालयस्य कीर्त्तिः सर्वत्र प्रचारिता प्रसारिता च भविष्यतीति मे विश्वासः।

स्वल्पीयसा कालेन स्वल्पसाधनेन च प्रथमस्याङ्कस्य सफलतापूर्वकं प्रकाशनाय महाविद्यालयस्य प्राचार्यसमेताः सर्वे छात्राः, अध्यापकाः, कर्मचारिणः यतमानाः सन्ति। अतः सर्वे धन्यवादार्हाः। अस्याः पत्रिकायाः प्रकाशनार्थं महाविद्यालयपरिवारस्य सर्वेषां सर्वासां च कृते शुभकामनाः।

प्रो. किशोरचन्द्रपाढी

परिचालनासमितेः अध्यक्षः



## प्राचार्यवार्त्ता

विश्वानि देव सवितर्दुरितानि परासुव।
यद्भद्रं तन्न आ सुव।

महत आनन्दस्यायं विषयो यदस्माकं महाविद्यालयपक्षतः प्रप्रथमतया कलियाचक-आदर्शवार्त्ता इत्यभिधेया वार्त्तापत्रिका प्रकाश्यत इति। वस्तुत महाविद्यालयस्य प्राचार्यरूपेण कार्यभारस्य ग्रहणकालादेवासीद्विचारोऽयं मे मनसि यदस्माकं महाविद्यालयस्य काचिद्वार्षिकी वार्त्तापत्रिकापि भवतु। तस्मान्मे मनोरथः फलीभूत इति विज्ञाय सन्तोषमनुभवामि। वार्त्ता पत्रिकेयं दर्पण इवास्माकं महाविद्यालयस्य सर्वविधकार्यक्रमान्, समुन्नतिं प्रगतिञ्च प्रदर्शयिष्यति मे दृढविश्वासः। अस्मिन्नवसरे सर्वेभ्यः परिवारसदस्येभ्य अध्यापकेभ्यः, कर्मचारिभ्यः, छात्राभ्यः छात्रेभ्यश्च भृशमभिनन्द्य सम्पादकेभ्यः सततमभिवन्द्य भगवत्या वाग्देव्याः पदारविन्दयोः नतिततीः पुरस्सरमुपरमामि।

डॉ. देवीपदरथः

प्राचार्यः

# संस्कृतशिविरवार्त्ता

### वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते

'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा' इति धिया संस्कृतमयवातावरणसंस्थापनाय छात्राणां हितसाधनाय कथम्वा छात्राः संस्कृतेन व्यवहरेयुरित्यस्मात्कारणात् प्रतिवर्षमिव ऐषमोऽपि सत्रारम्भे अस्माकीनमहाविद्यालये छात्राणां कृते संस्कृतसम्भाषणशिविरस्य आयोजनमभूत्। अखिलभारत-अमृतवाणी-सेवाप्रतिष्ठानस्य साहाय्येन अस्मन्महाविद्यालये दशदिवसीयसंस्कृतसम्भाषणशिविरं दिनाङ्कः १५-०७-१९ तः २४-०७-१९पर्यन्तं प्रायोजितम्। अत्र प्रमुखशिक्षकत्वेन तपनकुमारपण्डा, जयप्रकाशशास्त्री, नारायणपण्डा, अनन्यागिरिप्रमुखा भागं निरवहन् तथा कार्यक्रमस्यास्य संयोजकरूपेण अस्मदीया अध्यापका अवर्तन्त ।सम्पूर्णकार्यक्रमोऽयं प्राचार्याणां डा.देवीपदरथमहाशयानां प्रत्यक्षतत्त्वावधानेन प्राचलत्। शिविरस्य समापनसमारोहे अस्माकीना महाविद्यालयपरिचालनपरिषदध्यक्षाः प्रो.किशोरचन्द्रपाढीमहोदयास्तेषां सहभागिनीश्रीमतीमीनाक्षीमिश्रमहोदयाश्च मुख्यातिथित्वेन समुपस्थाय विज्ञानस्य तत्त्वानुशीलने संस्कृतम् इति विषयोपरि स्वकीयं वैदुष्यपूर्णमभिभाषणमुपस्थापितवन्तः। तथा अमृतवाणिसेवाप्रतिष्ठानस्याध्यक्षाः डा.कुमारचन्द्रमिश्रमहोदयाः सम्मानितातिथित्वेनागत्य छात्रानुद्दिश्य स्वकीयं सारगर्भकं भाषणं प्राददात्। दशदिवसात्मके शिविरे प्रशिक्षितै अस्मदीयच्छात्रैः छात्राभिश्च संस्कृतनृत्य-संगीत-नाटक-अभिनयादिमाध्यमेन स्वीयान्तर्निहितकलाः प्रकाशयामासुः।






## अन्तर्जालपटलस्योद्घाटनम्

आधुनिकसंगणकीययुगेऽस्मिन् सर्वान्नपि सर्वत्र प्रापयितुं महदुपयोगो वर्तते अन्तर्जालस्य। संप्रति सर्वविधकार्यमपि विना संगणकमन्तर्जालञ्च न कदाचित् सरलतया सम्भवति। अत अस्मत्प्राचार्याणामाध्यक्षेन कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयस्यापि अन्तर्जालपटलस्य निर्माणं जातम्। यद्द्वारा सर्वेऽपि विषयाः सूचनाश्च तन्माध्यमेन प्राप्नुयुरिति मत्वा तस्य शुभोद्घाटनं २५-०७-२०१९तमे दिनाङ्के अस्माकीनमहाविद्यालयप्रबन्धनसमितेरध्यक्षचरणानां प्रो.किशोरचन्द्रपाढी महोदयानां शुभकरकमलाभ्यामभवत्। तत्र तैस्सह तेषां सहधर्मिण्यः मीनाक्षीमिश्रमहाशयाः तथा अमृतवाणीसेवाप्रतिष्ठानस्य अध्यक्षाः कुमारचन्द्रमिश्रमहाभागाश्च आसन्। अस्य अन्तर्जालपटलस्य निर्माणसमितेः सदस्यत्वेन डा.किंशुकशाहा-डा.दयानन्दपाणिग्राही-श्रीदेवकुमारगोल-श्रीसमरजितसाहु-श्रीप्रसेनजितसाहुप्रभृतय आसन्। अस्यान्तर्जालपटलस्य अन्तर्जालस्थानकं (website address)भवति -

http://kaliachakbkasanskritmahavidyalaya.org/



## व्यासपूर्णिमा

### व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे

महाविद्यालयस्य पवित्रपरिसरे आषाढपूर्णिमायामांग्ले २०१९ तमे वर्षे १६ जुलाई दिनाङ्के भगवतः विष्णोरंशभूतस्य अपरकृष्णस्य श्रीकृष्णद्वैपायनस्य व्यासदेवस्य पवित्रस्य 'व्यासपूर्णिमा 'उत्सवस्य परिपालनमभवत्। यत्र सर्वे प्राध्यापकाः छात्राश्च मिलित्वा भगवतो व्यासदेवस्य पवित्रस्तुतिस्तवनपूर्वकं भगवद्गीताया आवृत्तिं कृतवन्तः।

## रक्षाबन्धनम्

**जनेन विधिना यस्तु रक्षाबन्धनमाचरेत्।**

**स सर्वदोषरहित सुखी संवत्सरे भवेत्।।**

प्रतिवर्षं श्रावणपूर्णिमायां भ्रातृभगिन्योः पावनं पर्व रक्षाबन्धनं हर्षोल्लासपुरःसरं महाविद्यालयपरिसरेऽस्मिन् परिपाल्यते। ऐषम उत्सवोऽयमांग्लवर्षस्य अगष्टमासस्य चतुर्दशदिनाङ्के परिपालितः। कार्यक्रमस्यास्याध्यक्षं श्रीमता प्राचार्येण डा. देवीपदरथमहोदयेन सम्पादितम्। कार्यक्रमेऽस्मिन् महाविद्यालयस्य सर्वे छात्राः प्राध्यापकाः शिक्षाकर्मिणश्चोपस्थिता आसन्। दीपप्रज्ज्वालनेन वैदिकमङ्गलाचरणेन च कार्यक्रमस्य शुभारम्भो विहितः। ततः परमुपस्थितानां समेषां रक्षासूत्रबन्धनेन मिष्टान्नसेवनेन च कार्यक्रमोऽयं समाप्तिमगात्।




## स्वतन्त्रतादिवसः परिपालितः

**वन्दे भारतमातरम्**

१५-०८-२०१९ तमदिनाङ्के ७३तमस्वतन्त्रतादिवसः छात्रैः प्राध्यापकैः कर्मचारिभिश्च परिपालितः। राष्ट्रियध्वजायाः समुत्तोलनपूर्वकं स्वतन्त्रतासंग्रामसूरिणां वीरपुरुषाणामनुसरणपूर्वकं नवभारतस्य निर्माणाय प्राचार्येण डा.देवीपदरथेन छात्राः प्रचोदिताः। महाविद्यालयेन सह समाजस्य देशस्य च समुन्नतये युवशक्तिः संघबद्धरूपेण कार्यं कुर्यादित्यपि प्राचार्येण परामर्शो दत्तः।



## संस्कृतसप्ताहोत्सवकार्यक्रमः

**भाषासु मधुरा रम्या दिव्या गीर्वाणभारती**

प्राच्यसंस्कृतिसंरक्षणार्थं, विशेषतः सर्वभाषाजनन्याः संस्कृतभाषायाः प्रचारार्थं प्रसारार्थञ्च प्रतिवर्षं महाविद्यालयेऽस्मिन् श्रावणपूर्णिमायां संस्कृतदिवसपालनमभिलक्ष्य संस्कृतसप्ताहसमारोहकार्यक्रमस्य समुद्घाटनं १४-०८-२०१९ तमतारिकायामभवत्। प्राचार्यस्य डा. देवीपदरथमहोदयस्य आध्यक्षेण आयोजितेऽस्मिन् समारोहे डा.रमेशझा, डा. अमरेन्द्रकुमारमिश्रः, डा.किंशुकसाहा, श्रीसञ्जयअग्निहोत्री, डा.ज्योतोर्मयरायः,डा.संकर्षणपण्डा, डा.नृसिंहनाथगुरुः, डा.दयानन्दपाणिग्राही, श्रीसुरञ्जनपाह्वाढी, श्रीदेवकुमारगोलः, श्रीसमरजितसाहुः, श्रीविमानकुमारनायकप्रमुखा विद्वांसः उपस्थिताः सन्तः सप्ताहोत्सवपालनस्य आभिमुख्यविषये, संस्कृतशिक्षाया आवश्यकताविषये च बहुपरामर्शान् दत्तवन्तः। अस्मिन् संस्कृतसप्ताहसमारोहे बहुविधसंस्कृप्रतियोगिताः छात्राणां मध्ये आयोजिताः। १९-०८-२०१९ तमे दिनाङ्के कार्यक्रमस्यास्य महता समारोहेण समापनसमारोहः प्रायोजितः। सर्वस्यास्य कार्यक्रमस्य संयोजकत्वेन डा.संकर्षणपण्डा सर्वमपि कार्यं सम्पादितवान्।








# नवीनवरणोत्सव:

## आनन्दधारा वहति भुवने

परम्परानुसारं महाविद्यालयेऽस्मिन् नवागतानां छात्राणां कृते नवीनवरणोत्सवो महता आडम्बरेण परिपाल्यते। ऐषम: स्वागतोत्सवोऽयं सितम्बरमासस्य त्रयोदशदिनांके (१३-०९-२०१९) समनुष्ठित:। उत्सवेऽस्मिन् पटासपुरनिर्वाचनमण्डल्या मान्यवरविधायका अध्यापका ज्योतिर्मयकरमुख्यातिथिरूपेण, जुखिआग्रामपञ्चायताध्यक्षा: श्रीमन्त: अम्बिकेशमान्नामहोदयाश्च सम्मानितातिथिरूपेण समागता:। कार्यक्रमस्य शुभारम्भ: अतिथिभि: प्राचार्यमहोदयैश्च वाग्देव्या: पूजनपूर्वकं विहित:। तत: चन्दन - पुष्पवृक्ष -उपढौकनादिभि: अतिथयो महाविद्यालयपक्षत: सम्मानिता:। अस्मिन्नेवावसरे छात्रा नृत्य-गीत-अभिनयादिसांस्कृतिककार्यक्रमान् प्रादर्शयन्। अतिथय आशीर्वादप्रदानपूर्वकं स्वीयानुभवं प्रकटितवन्त: छात्रानुद्बोधितवन्तश्च। अत्रत्या: प्रवीणा: छात्रा: पुष्पोपहारप्रदानपूर्वकं नवीनानां स्वागतीकृतवन्त:। अन्ते कविगुरो: रवीन्द्रनाथस्य आनन्दधारा वहति भुवने इति सुप्रसिद्धसंगीतमाध्यमेन उत्सवस्य समापनमभवत्।






# षष्ठदीक्षान्तसमारोह:

२४-०८-२०१९ तमदिनांके शनिवासरे नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानेन प्रायोजिते षष्ठदीक्षान्तसमारोहे अस्मदीयमहाविद्यालयस्य डा.किंशुकसाहा-श्रीसुरञ्जनपाहाढीमहोदययोर्मार्गदर्शनेन ५६ संख्यका: छात्रा उपस्थिता आसन्। सहयोगिरूपेण शिक्षाकर्मी श्रीविश्वजित् जाना आसीत्। अस्मिन्नवसरे महाविद्यालयस्य छात्री प्रियङ्कादासस्वर्णपदकेन सभाजिता।

राष्ट्रियसंस्कृतसंस्थानस्य षष्ठदीक्षान्तसमारोहे अस्माकं कलियाचकविक्रमकिशोर-आदर्शसंस्कृतमहाविद्यालयस्य सुश्री प्रियङ्कादास इति छात्रा २०१७तमवर्षेस्य कृते अखिलभारतीयस्तरे साहित्याचार्यकक्षायां सर्वाधिकान् अङ्कान् संम्प्राप्य स्वर्णपदकं प्राप्तवती इति अस्माकं कृते महत्प्रमोदस्य विषय:। भगवान् तस्यै सर्वविधसमुन्नतिं प्रददातत्विति महाविद्यालयपरिवारप्रार्थना।









# शिक्षकदिवससमारोहः

अनुपासितवृद्धानां विद्या नाऽतिप्रसीदति

शिक्षकसमाजस्य चिरनमस्यस्य डा.सर्वपल्ली राधाकृष्णन् महोदयस्य जन्मदिवसे सितम्बरमासस्य पञ्चमे दिनाङ्के महाविद्यालयपरिसरे शिक्षकदिवसः समायोजितः। प्राचार्यस्य डा.देवीपदरथमहोदयस्य पौरोहित्येन आयोजितेऽस्मिन् समारोहे सर्वेऽन्तेवासिनो उपस्थिता आसन्। भगवत्याः पूजनेन दीपप्रज्ज्वालनेन वैदिकमङ्गलाचरणेन स्वागतसंगीतमाध्यमेन च कार्यक्रमस्य शुभारम्भो जातः। छात्रैर्गन्ध -पुष्प - उपहार-स्मारकप्रदानपूर्वकं गुरूणां स्वागतं पूजनञ्च विहितम्।सर्वे प्राध्यापकाः श्रीराधाकृष्णन् महोदयस्य व्यक्तित्वविषये शिक्षकाणामादर्शसमाजसंस्तापनाय छात्रान् बहुपरामर्शान् दत्तवन्तः। प्राचार्याणामाशीर्वचनेन तथा च छात्राणां गुरुवन्दनेन सभेयं समाप्ता। प्रतिवर्षमिव समारोहस्यास्य सर्वं सञ्चालनादिकं शास्त्रितृतीयवर्षस्य छात्राणां प्रतिनिधित्वेन समभवत्।







## राज्यस्तरीयशास्त्रीयस्पर्धा

राष्ट्रियसंस्कृतसंस्थानानुकूल्येन नवम्बरमासस्य २७-२८तमदिनांकयोः प्रायोजितायां द्विदिवसीयराज्यस्तरीय-शास्त्रीयस्पर्धायामस्माकं महाविद्यालयस्य श्रीसुरञ्जनपाहाढी-श्रीदेवकुमारगोलमहोदययोः मार्गदर्शनेन अष्टौ छात्राः कोलकातास्थसीतारामवैदिकआदर्शसंस्कृतमहाविद्यालये विभिन्नासु स्पर्धासु सोत्साहं भागं गृहीत्वा प्रथम-द्वितीय-तृतीयस्थानादिकं लब्धवन्तः।







## सरस्वतीपूजनम्

सरस्वती नः सुभगामयस्करत्

३०-०१-२०२० तमे दिनाङ्के अस्मन्महाविद्यालये भगवत्याः वाग्देव्याः पूजनं महता समारोहेण परिपालितः। अस्मिन् पूजनकार्यक्रमे सर्वेषां महाविद्यालयीयानां परिवारसदस्यानां सम्पूर्णसहयोगमासीत्। यत्र सर्वे छात्रा भगवत्याः पूजनस्थानत आरभ्य महाविद्यालयस्य सुसज्जीकरणाय तत्परा आसन्। स्वयं प्राचार्य डॉ. देवीपदरथमहोदयः छात्राणां हितकामनया पौरोहित्यकार्यं सम्पादितवान्। पूजनान्ते ग्रामीणानां कृते महाविद्यालयपक्षतः प्रसादवितरणसेवा आसीत्। अस्य पूजनकार्यस्य सुसम्पादनं श्रीसुरञ्जनपाहाढी तथा श्रीसमरजितसाहुप्रमुखाणां तत्त्वावधानेन समभवत्।

## वार्षिकसांस्कृतिकप्रतियोगिता

विद्यार्थिषु सुप्तरूपेण प्रतिभा(नव नवोन्मेषशालिनी शेमुषी)अवश्यं विराजते। अन्तर्निहिताया: प्रतिभाया: विकासाय प्रतिवर्षं महाविद्यालयपरिसरेऽस्मिन् वार्षिकसांस्कृतिकप्रतियोगिता आयोज्यन्ते। ऐषम: फेब्रुयारीमासस्य ११-१२दिनाङ्कयो: वार्षिकसांस्कृतिकप्रतियोगिता आयोजिता आसन्। भगवत्यै श्रीश्रीवाग्वादिन्यै दीपप्रज्ज्वालनं माल्यार्पणञ्च विधाय छात्रैर्मङ्गलाचरणेन आयोजितस्पर्धानां शुभारम्भ: कविगुरो: अग्ने: स्पर्शमणिं लगय प्राणे रिति प्रसिद्धसंगीतमाध्यमेनाभवत्। अस्मिन् क्रमे विविधप्रतियोगिता: संस्कृतभाषण-संगीत- कण्ठपाठ-नृत्य-अन्त्याक्षरीप्रभृतय आयोजिता:। संगीतप्रतियोगितायाया निर्णायकरूपेण प्रसिद्धसंगीतकारा वेतारशिल्पिन: श्रीमन्त: सपनकुमारमाइतिमहाशया: समागता आसन्। नृत्यस्पर्धाया निर्णायकत्वेन सुश्री: सुपर्णा जाना महाशया समगता आसीत्। अस्य कार्यक्रमस्य समागतानामतिथीनां स्वागतं प्राचार्येण डा.देवीपदरथमहोदयेन विहितम्। समग्रकार्यक्रमस्य संयोजक: डा. संकर्षणपण्डा, आवाहक: वांग्लाविभागाध्यापक: डा.ज्योतिर्मयराय: तथा सदस्य: साहित्यविभागस्याध्यापक: डा.नृसिंहनाथगुरुश्च आसीत्। अन्त्ये सर्वेभ्य: धन्यवादार्पणं धर्मशास्त्रविभागस्य अतिथिप्राध्यापक: श्रीसुरञ्जनपाहाढी प्रदत्तवान्।











## वार्षिकक्रीडास्पर्धा

### शरीरमाद्यं खलु धर्मसाधनम्

फेब्रुयारीमासस्य १३-०२-२०२० तमे दिनाङ्के ८.३० वादनतो वार्षिकक्रीडाप्रतियोगिता समायोजिता। छात्राणां मध्ये धावनं, दीर्घकूर्दनं, उच्चकूर्दनं, अय:गोलकक्षेपणं , मृत्पात्रभञ्जनं,कुक्कुटयुद्धयादिस्पर्धा: आयोजिता अभवन्।एतासु स्पर्धासु निर्णायकत्वेन महाविद्यालयस्य प्राचार्यसमेता: सर्वे प्राध्यापका: कर्मचारिणश्चासन्।प्रतिवर्षं शारीरकशिक्षकस्याभावे तथा विस्तीर्णक्रीडाङ्गणस्याभावेऽपि छात्राणामुत्साहवर्धनाय नैका: स्पर्धा: समायोज्यन्ते यत्र सर्वा: स्पर्धा: प्राचार्येण सञ्चाल्यन्ते सम्पाद्यन्ते च। अन्ते सर्वेऽन्तेवासिनो एकत्र सम्मिल्य सानन्दं भोजनं कृतवन्त:। वार्षिकक्रीडास्पर्धाया: परिचालनासमितेरावाहक: श्रीसञ्जयअग्निहोत्री, तथा अन्ये सदस्या डा. दयानन्दपाणिग्राही, श्रीदेवकुमारगोल:, श्रीविमानकुमारनायकप्रमुखा: सर्वेभ्यो धन्यवादान् दत्तवन्त:।







## आगामिसंकल्पना:

*** भवनप्रवेश:, वार्षिकोत्सव:,पुरस्कारवितरणञ्च**

- **मुख्यातिथि: - प्रो. डॉ.परमेश्वरनारायणशास्त्री** (मान्यवरकुलपति:, राष्ट्रियसंस्कृतसंस्थानस्य)
- **सम्मानितातिथि: - श्रीमान् अर्धेन्दुशेखरमाइति:** (मान्यवरविधायक:, भगवानपुरनिर्वाचनमण्डल्या:)
- **अध्यक्ष: - प्रो. डॉ. किशोरचन्द्रपाळी** (मान्यवराध्यक्ष:,महाविद्यालयप्रबन्धनसमिते:)
- **दिनाङ्क:** - १४-०३-२०२०

*** पञ्चम - राष्ट्रियसंगोष्ठी**

- **विषय:** - भारतीयसंस्कृतौ वर्णाश्रमव्यवस्था
- **दिनाङ्क:** - २५-०३-२०२०

## छात्राणामुपलब्धय:

यू.जी.सी.नेट् परीक्षायां समुत्तीर्णा अस्मदीया: छात्रा:

| क्र. | नाम. | विभाग: | वर्षम् |
|---|---|---|---|
| १. | कन्हाइलालसाहु | धर्मशास्त्रम् | २०१७ |
| २. | सुमनाभट्टाचार्य: | धर्मशास्त्रम् | २०१७ |
| ३. | शुभङ्करपण्डा | साहित्यम् | २०१५ |
| ४. | तरुणकुमारमण्डल: | साहित्यम् | २०१८ |
| ५. | दीपकप्रधान: | साहित्यम् | २०१८ |
| ६. | प्रियङ्कादास: | साहित्यम् | २०१७ |
| ७. | रुम्पादास: | साहित्यम् | २०१७ |
| ८. | संजयकारक: | व्याकरणम् | २०१७ |
| ९. | महेश्वरवाग: | व्याकरणम् | २०१६ |

- अस्माकं छात्र: **तरुणकुमारमण्डल** ऐषम पश्चिमवंगराज्यसर्वकारस्य गुरुदासमहाविद्यालये सहायकाचार्यरूपेण नियुक्त:।

## अध्यापकीयवार्त्ता

**डॉ.देवीपदरथ:**

- महाविद्यालयस्य प्राचार्य: डॉ.देवीपदरथमहोदय: (Indian Institute of National Heritage) संस्थया २०१९ तम वर्षे **भारतगौरव** सम्मानेन सम्मानित:।

**डॉ.नृसिंहनाथगुरु:**

- साहित्यविभागस्याध्यापक डॉ.नृसिंहनाथगुरु: यू.जी.सी. [illegible]क्रमे १४-१०-२०१९ त: २६-१०-२०१९ पर्यन्तं विश्वविद्यालय-अनुदान-आयोगस्थमानवसंसाधनविकास[illegible] जवाहरलालनेहरुविश्वविद्यालयस्थे अंशग्रहणमकरोत्।
- हैदरावादनगरे विद्यमाने वेगमपेट-महिला[illegible] राष्ट्रियचच्चासत्रे भागग्रहणं कृतवान्। राष्ट्रियचर्च्चासत्रस्य विषय आसीत् संस्कृतसाहित्यं प्रति तेलेङ्गानाप्रदेशस्य[illegible] आचार्यजी.गङ्गात्रामहोदयस्याभिनन्दनग्रन्थस्य सम्पादनं विहितं यस्य लोकार्पणं १३-११-१९ दिनाङ्के पुरीस्थश्री[illegible]परिसरे अभवत्।
- १६-११-२०१९ तमे दिनांके राष्ट्रियसंस्कृतसंस्थानस्य श्रीसदाशिवपरिसरे राज्यस्तरीयशास्त्रीयस्पर्धायां निर्णायकरूपेण भागमग्रहीत्।

**डॉ.संकर्षणपण्डा**

- श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्थव्याकरणविभागेनायोजिते विश्वविद्यालय-अनुदानायोगानुमोदिते पाणिनीयनियमसूत्रविमर्श इति विषयान्विते राष्ट्रियचर्च्चासत्रे ०३-०३-२० त: ०४-०३-२० पर्यन्तं विषयविशेषज्ञरूपेणभागग्रहणं कृत्वा स्वीयशोधप्रबन्धं प्रस्तुतवान्।

**डॉ.दयानन्दपाणिग्राही**

- अद्वैतवेदान्तविभागस्य अध्यापक डॉ.दयानन्दपाणिग्राही यू.जी.सी.अभिविन्यासपाठ्यक्रमे ०७-०९-२०१९ त: २७-०९-२०१९ पर्यन्तं भागग्रहणं कृतवान्। ३९तम अभिविन्यासपाठ्यक्रमोऽयं विश्वविद्यालय-अनुदान-आयोगस्थमानवसंसाधनविकास-मन्त्रालयकेन्द्रानुकूल्येन उत्कलस्थे सम्बलपुरविश्वविद्यालये प्रचालित आसीत्।
- फेवृयारीमासस्य ११-१३ दिनाङ्कयावत् गुजरातप्रदेशस्थश्रीसोमनाथसंस्कृतविश्वविद्यालयद्वारा अनुष्ठिते "भाष्यपरम्परा ज्ञानप्रवाहश्च" इत्याख्ये अन्ताराष्ट्रियपरिसम्वादे शोधपत्रवाचकत्वेन उपस्थाय स्वीयं शोधपत्रं प्रस्तुतवान् आसीत् डॉ.दयानन्दपाणिग्राही।

# अस्माकं महाविद्यालय:

वङ्गप्रदेशस्य एकस्मिन् प्रान्तभागे उत्कलप्रदेशस्य सीमान्तवर्त्तिक्षेत्रे ग्राम्यपरिवेशस्य प्राकृतिकशोभाविमण्डितप्रान्ते च विद्यमानोऽयं महाविद्यालय: कृतविद्यान् विद्यार्थिनो निर्माय समग्रे प्रदेशे स्वनिमित्तं स्वतन्त्रस्थानस्य संरक्षणं कृतमस्ति। अभिज्ञानामध्यापकानाम् अध्यापनबलेन अस्यानुष्ठानस्य बहवो मेधाविछात्रा: स्वर्णपदकादीनि सम्प्राप्य स्वस्वक्षेत्रे प्रतिष्ठां लब्धवन्त:। इयं भूमि: मे धन्या ।यतो हि अस्मदादीनां प्रात:स्मरणीयानामृषिकल्पानां पण्डितप्रवराणां विद्यासागर- महोदयानां जन्मभूमि:, अपि च प्रसिद्धकथाकारस्य वङ्किमचन्द्रस्य कर्मभूरियम्।एतादृशमहनीयपुरुषाणां प्रदेशे विगते १९९८ तमे खीष्टाब्दे अत्रत्यभूमिदातृस्वर्गीयजगदीशचन्द्रसाहु-ज्योतिर्मयसाहुमहोदययो: पितृणां स्वर्गतविक्रमकिशोरसाहुमहोदयानां नामानुसारेण संस्थापितोऽयं महाविद्यालय:। प्रतिवर्षमस्य राज्यस्य दूरवर्त्ति वर्धमान-वाँकुडा-सागरदीप-हुगुलि-पुरुलिआप्रभृति मण्डलेभ्य: तथा च विहार-उत्कलप्रदेशाच्च ( त्रिवेणीसंगमवत् अंगवंगकलिङ्गादि- देशेभ्य:) छात्रा अत्रागत्यानुदिनं सश्रद्धं सानन्दं संस्कृतं पठन्त्येव। मेदिनीपुरमण्डलस्य अयमेक एव संस्कृतमहाविद्यालयो यत्र छात्रा आचार्योपाधि- (एम्.ए)मधिगम्य विद्यालयेषु महाविद्यालयेषु च नियुक्तास्सन्त अध्यापनादिकृत्यं कुर्वन्ति। समग्रे भारतवर्षे आचार्यपरीक्षायां प्रथमस्थानमधिगत्यास्य महाविद्यालयस्य नैके छात्रा: प्रायश: राष्ट्रियसंस्कृतसंस्थानेन स्वर्णपदकै: विभूषिता:, अखिलभारतीय शास्त्रीयस्पर्धासु अस्य छात्रा: स्थानमवाप्य भृशं प्रशंसिताश्च। संस्थानस्य बहुषु परिसरेष्वस्य छात्रा: शिक्षाशास्त्रि-शिक्षाचार्य-गवेषणादिकञ्च कुर्वन्तो विराजन्ते। प्रतिवर्षं महाविद्यालयस्य प्रायश: छात्रा: यू.जी.सी. नेट्/ जे.आर्.एफ् परीक्षासु उत्तीर्णा भवन्ति। प्राक्शास्त्रिकक्षात: आचार्यकक्षां यावत् विविधा: शास्त्रीयविषया: यथा साहित्य- धर्मशास्त्र-नव्यव्याकरण-अद्वैतवेदान्ता अध्याप्यन्ते। शास्त्रिस्तरे सम्मानपाठ्यक्रमेण सह वांग्ला - आंग्ल -समाजशास्त्र - संगणकविज्ञान -परिवेशविज्ञानादिविषया अप्यध्याप्यन्ते इति।





डॉ.देवीपदरथ:,प्राचार्य:
प्रधानसम्पादक:



डॉ.किंशुकसाहा
सम्पादक:



डॉ.संकर्षणपण्डा
सहसम्पादक:



डॉ.दयानन्दपाणिग्राही
सहसम्पादक:

## सम्पादकीयम्

लसतु संस्कृतं चिरं गृहे गृहे च पुनरपि इति स्मारं स्मारं भाषाजनन्या: संस्कृतभाषाया: प्रचारार्थं प्रसारार्थं चानुदिनं दृढपरिकरा वयम्। तदर्थमनिशं महाविद्यालयपक्षतो नैरन्तर्यप्रतियत्न:। नववसन्ते नवरूपेण सुसज्जिता सती प्रथमवारमात्मप्रकाशं करोति कलियाचक-आदर्शवार्त्ता नाम्ना मनोरमा वार्त्तापत्रिकेयम्।प्राचार्यसमेतानामस्मत्परिसरीयछात्राणाम् अध्यापकानां कर्मचारिणाञ्च वार्षिकी या प्रगति:, या समुन्नति:, तस्या: लोकमुखीकरणाय अस्माकीनोऽयं प्रयत्न:। सुधिय: पत्रिकायामस्यां विद्यमानान्दोषान् परित्यज्य गृह्णन्तु गुणानिति सम्प्रार्थ्य विरम्यते विस्तरात्।


**प्रकाशक:**

कलियाचकविक्रमकिशोरआदर्शसंस्कृतमहाविद्यालय:,
हेडिया,पूर्वमेदिनीपुरम्,पश्चिमवंग:-७२१४३०
दूरभाष: - ०३२२० - २७६०३६
ईमेल् - kaliachakbkasm@gmail./yahoo.com
Web http://kaliachakbkasanskritmahavidyalaya.org